# आदर्श-प्रश्न-पत्रम्-2019-20

## कक्षा : दशमी

## संस्कृतम् (122)

## मॉडल पेपर-9

**समयः- होरात्रयम्** **सम्पूर्णांकाः-80**

**सामान्यनिर्देशाः-**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यं लेखनीयः।
4. अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्-**

| | |
|---|---|
| **खण्ड : क : अपठित-अवबोधनम्** | **10 अंकाः** |
| **खण्ड : ख : रचनात्मककार्यम्** | **15 अंकाः** |
| **खण्ड : ग : अनुप्रयुक्तव्याकरणम्** | **25 अंकाः** |
| **खण्ड : घ : पठित-अवबोधनम्** | **30 अंकाः** |

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
(iii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
(v) प्रश्नानाम् निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

## खण्डः - क 10 अंकाः

## अपठित-अवबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 10**

कालिदासस्य लोकप्रियतायाः कारणं तस्य प्रसादगुणयुता ललिता परिष्कृता शैली अस्ति। शब्दलाघवः कालिदासस्य कलात्मकरुचेः परिचायकः अस्ति। चरित्रचित्रणे कालिदासः अतीव पटुः अस्ति। तस्य भाषा भावाश्च पात्रानुकूलौ तिष्ठतः। कालिदासस्य प्रकृतिचित्रणं अतीव रम्यम् अस्ति। कालिदासमतेन तपसा प्रेम निर्मलं पुष्टं च भवति। कालिदासः उपमा प्रयोगे प्रसिद्धः अस्ति। कालिदासेन विरचिताः सप्तग्रन्थाः सन्ति-कुमारसम्भवम्, मेघदूतम्, रघुवंशम्, ऋतुसंहारम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञान शाकुन्तलम् चेति। एते अद्यासि जनानां हृदयान् सम्मोहयन्ति प्रेरयन्ति च। अभिज्ञान शाकुन्तलम् इव नाट्यकृतिः न अन्यद् अस्ति धरातले। कथ्यते च 'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।'

1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) $1 \times 2 = 2$
   (i) कालिदासेन विरचिताः कति ग्रन्थाः सन्ति?
   (ii) कालिदासः कस्मिन् प्रयोगे प्रसिद्धः अस्ति?
   (iii) चरित्रचित्रणे कः पटुः अस्ति?
2. पूर्णवाक्येन लिखत- (केवलं प्रश्नद्वयम्) $2 \times 2 = 4$
   (i) महाकविकालिदासेन विरचिताः ग्रन्थाः के सन्ति?
   (ii) अभिज्ञानशाकुन्तलस्य विषये किं कथ्यते?
   (iii) कालिदासस्य कलात्मक रुचेः परिचायकः कः अस्ति?
3. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1
4. यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'रम्यम्' इति विशेषणपदस्य विशेष्यपदं गद्यांशे किम् प्रयुक्तम्?
      (क) प्रेम
      (ख) भाषा
      (ग) प्रकृतिचित्रणम्
   (ii) 'कुशलः' इत्यर्थे गद्यांशे किम् पदं प्रयुक्तम्?
      (क) पटुः
      (ख) अद्वितीयः
      (ग) प्रसिद्धः

(iii) 'प्रेरयन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(क) हृदयम्

(ख) शैली

(ग) एते

(iv) 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) उपमायैः

(ख) कालिदासाय

(ग) ग्रन्थेभ्यः

**उत्तरम् :**

1. (i) सप्त

(ii) उपमाप्रयोगे

(iii) कालिदासः

2. (i) महाकविकालिदासेन विरचिताः ग्रन्थाः सन्ति– कुमारसंभवम्, मेघदूतम्, रघुवंशम्, ऋतुसंहारम्, मालविकाग्निमित्रम्, विक्रमोर्वशीय, अभिज्ञान-शाकुन्तलम् च।

(ii) अभिज्ञानशाकुन्तलस्य विषये कथ्यते–"काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।"

(iii) शब्दलाघवः कालिदासस्य कलात्मक रुचेः परिचायकः अस्ति।

3. **शीर्षक–** कवि कालिदासः, कालिदासस्य साहित्य।

4. (i) (ग) प्रकृतिचित्रणम्

(ii) (क) पटुः

(iii) (ग) एते

(iv) (ख) कालिदासाय

## खण्डः – ख 15 अंकाः

## रचनात्मककार्यम्

**2. भवान् सुयशः। राष्ट्रमण्डलखेलानाम् विषये मित्रं गौरवं प्रति सूचयता लिखिते पत्रे मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि च पूरयित्वा पत्रं पुनः उत्तरपुस्तिकायाम् लिखत।** $\frac{1}{2} \times 10 = 5$

56, मालवीयनगरम्

वाराणसीनगरात्

प्रियमित्र (1) ..........!

सप्रेम नमः।

अत्र कुशलं तत्रास्तु। भवान् इदं ज्ञात्वा अतिप्रसन्नः भविष्यति यत् गतमासे अहं मम (2) .......... सह दिल्लीनगरं गतवान्। दिल्ली नगरे राष्ट्रमण्डलखेलानाम् (3) .......... आसीत्। वयं प्रतिदिनं नवीनाः क्रीडाप्रतियोगिताः(4) .......... अगच्छाम्। तत्र अन्तिमे दिवसे 'बैडमिंटन' क्रीडाप्रतियोगितायाः आयोजनम् आसीत्।

यस्यां प्रतियोगिता 'साइना नेहवाल' प्रतियोगिनी (5) .......... प्रदर्शनम् अकरोत्। (6) ......... प्रतियोगितायां सा (7) .......... जितवती। भारतम् तु पदकतालिकायाम् द्वितीयं स्थानं प्राप्तवान्।

अयं मम (8) .......... अनुभवः आसीत्। अहं भारतस्य प्रदर्शनं दृष्ट्वा गौरवान्वितः (9) ..........। पितृभ्याम् प्रणामाः अनुजाय च स्नेहः।

तव मित्रम्

(10) ..........

| मञ्जूषा |
|---|
| सुखदः, सुयशः, मात्रा, गौरव, आयोजनम्, प्रशंसनीयम्, स्वर्णपदकं, तस्याम्, द्रष्टुम्, अभवम् |

**उत्तरम् :**

56, मालवीयनगरम्

वाराणसीनगरात्

प्रियमित्र (1) **गौरव!**

सप्रेम नमः।

अत्र कुशलं तत्रास्तु। भवान् इदं ज्ञात्वा अतिप्रसन्नः भविष्यति यत् गतमासे अहं मम (2) **मात्रा** सह दिल्लीनगरं गतवान्। दिल्ली नगरे राष्ट्रमण्डलखेलानाम् (3) **आयोजनम्** आसीत्। वयं प्रतिदिनं नवीनाः क्रीडाप्रतियोगिताः(4) **द्रष्टुम्** अगच्छाम्। तत्र अन्तिमे दिवसे 'बैडमिंटन' क्रीडाप्रतियोगितायाः आयोजनम् आसीत्।

यस्यां प्रतियोगिता 'साइना नेहवाल' प्रतियोगिनी (5) **प्रशंसनीयम्** प्रदर्शनम् अकरोत्। (6) **तस्याम्** प्रतियोगितायां सा (7) **स्वर्णपदकं** जितवती। भारतम् तु पदकतालिकायाम् द्वितीयं स्थानं प्राप्तवान्।

अयं मम (8) **सुखदः** अनुभवः आसीत्। अहं भारतस्य प्रदर्शनं दृष्ट्वा गौरवान्वितः (9) **अभवम्**। पितृभ्याम् प्रणामाः अनुजाय च स्नेहः।

तव मित्रम्

(10) **सुयशः**।

**3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–** $1 \times 5 = 5$



| |
|---|
| **मञ्जूषा**–छात्रः, परीक्षादिवसः, छात्रा, मञ्चौ, गवाक्षे, घटिकायन्त्रम्, तिष्ठतः, कुरूतः, सपाद–अष्टवादनम्, प्रारम्भः, परीक्षायाः, दृश्यते। |

**उत्तरम् :**

1. अस्मिन्, चित्रे परीक्षायाः प्रारम्भः प्रतीयते।
2. परीक्षादिवसः आगतः।
3. अत्र छात्रः छात्रा च तिष्ठतः।
4. तौ वार्तां कुरूतः।
5. इह मञ्चौ स्तः।

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत–** $1 \times 5 = 5$

**"विद्यालये वनमहोत्सवं"**

| |
|---|
| **मञ्जूषा**–श्रावणमासे, वर्षाकालः, विविधाः वृक्षाः, आम्राः, अशोकाः, अर्जुनवृक्षाः, वाटिकायाम्, वृक्षाणां रोपणम्, छात्रैः शिक्षकैः च, सिञ्चनम्, प्राचार्यस्य भाषणम्, वृक्षाः, जीवनरक्षकाः, ओषजनप्रदायकाः, अस्माकं सर्वेषां कर्तव्यम्–वृक्षाणां संरक्षणम्। |

**उत्तरम् :**

**विद्यालये वनमहोत्सवं**

मम विद्यालये श्रावणमासे वनमहोत्सवः मान्यते। वर्षाकालः वृक्षवर्धकः भवति। वाटिकायाम् आम्राः, अशोकाः, अर्जुनवृक्षाः विविधाः वृक्षाः च विलसन्ति। छात्रैः शिक्षकैः च वृक्षाणां रोपणं क्रियते। सर्वेः सिञ्चनम् अपि क्रियते। प्राचार्यस्य भाषणं प्रेरणादायकम् आसीत्। वृक्षां जीवनरक्षकाः ओषजनप्रदायकाः च भवन्ति। **वृक्षाणां संरक्षणम्** अस्माकं सर्वेषां कर्तव्यम्।

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत–(केवलं वाक्यपञ्चकम्)** $1 \times 5 = 5$

1. वह प्रश्न पूछता है।
   He ask questions.
2. 5 सितंबर को शिक्षक दिवस मनाया जाता है।
   On 5th sep. teacher's day is celebrated.
3. ब्राह्मण रामायण पढ़ता है।
   Brahmin read the Ramayana.
4. पके हुए आम का रंग पीला होता है।
   Riped mango is yellow.
5. विद्यालय में दस कमरे हैं।
   There are ten rooms in the school.
6. अपना मोबाइल नंबर बताओ।
   Tell your mobile no.
7. बालक गेंद से खेलता है।
   The boy plays with ball.

**उत्तरम् :**

1. सः प्रश्नं पृच्छति।
2. सप्टेम्बरमासस्य पञ्चमे दिनाङ्के शिक्षकदिनम् आचर्यते/शिक्षकदिनं सम्पद्यते।
3. ब्राह्मणः रामायणं पठति।
4. पक्वम् आम्रफलं पीतम्/पीतवर्णीयम्।
5. विद्यालये दश प्रकोष्ठानि सन्ति।
6. तव भ्रमणध्वनिक्रमाङ्कं कथय/निवेदय।
7. बालकः कन्दुकेन क्रीडति।

## खण्डः ग 25 अंकाः

## अनुप्रयुक्तव्याकरणम्

**5. अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत– (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. एकम् अनुच्छेदं लिखत।
   **उत्तरम् :** अनु + छेदम्
2. चिदानन्दः ब्रह्मः।
   **उत्तरम् :** चित् + आनन्दः
3. अहं तस्य निग्रहं वायोः + इव दुष्कर मन्ये।
   **उत्तरम् :** वायोरिव
4. नृपः शत्रुम् + जयति।
   **उत्तरम् :** शत्रुञ्जयति
5. जगत् + नाथः चतुर्भुजो अस्ति।
   **उत्तरम् :** जगन्नाथः

**6. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. चक्रपाणिः सागरे शेते।
   (क) चक्रः पाणिः
   (ख) चक्रे पाणिः यस्य
   (ग) चक्रं पाणौ यस्य सः
   **उत्तरम् :** (ग) चक्रं पाणौ यस्य सः
2. महीपालः दिनं दिनं प्रजाः पालयति स्म।
   (क) प्रतिदिनम्
   (ख) प्रतिदिने
   (ग) दिनदिने
   **उत्तरम् :** (क) प्रतिदिनम्
3. तृणेषु वह्निज्वालाः समुत्थिताः।
   (क) वह्नि ज्वालाः
   (ख) वह्नेः ज्वालाः
   (ग) वह्ने ज्वालाः
   **उत्तरम् :** (ख) वह्नेः ज्वालाः

4. तौ पाणी च पादौ च प्रक्षालयतः।
(क) पाणिपादौ
(ख) पाणीपादौ
(ग) पाणिपादम्

**उत्तरम् :** (ग) पाणिपादम्

5. सः कर्मणि कुशलः अस्ति।
(क) कर्म कुशलः
(ख) कर्म कौशलः
(ग) कर्मे कुशलः

**उत्तरम् :** (क) कर्म कुशलः

**7. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. पठनेन नरः गुणवान् भवति।
(क) गुण + वतुप्
(ख) गुण + मत्
(ग) गुण + मतुप्

**उत्तरम् :** (ग) गुण + मतुप्

2. कीदृशी तव मैत्री?
(क) कीदृश + ई
(ख) कीदृश + ङीप्
(ग) कीदृक् + ङीप्

**उत्तरम् :** (ग) कीदृक् + ङीप्

3. मधुरा वाणी प्रीणयति मनः।
(क) मधुर + टाप्
(ख) मधुर + आप्
(ग) मधुर + चाप्

**उत्तरम् :** (क) मधुर + टाप्

4. अविवेकि + तल् दुःखाय भवति।
(क) अविवेकतः
(ख) अविवेकता
(ग) अविवेकिता

**उत्तरम् :** (ग) अविवेकिता

5. मरणमपि मूर्खत्वम् एव कथ्यते।
(क) मूर्ख + तल्
(ख) मूर्ख + त्वम्
(ग) मूर्ख + त्व

**उत्तरम् :** (ग) मूर्ख + त्व

**8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत-** $1 \times 3 = 3$

प्रतीक्षा- समीक्षे! त्वया कुतः (1) ..........?
समीक्षा- प्रतीक्षे! अधुना अहं विद्यालयात् (2) ..........।
प्रतीक्षा- समीक्षे! गृहं गत्वा त्वम् किम् करोषि?
समीक्षा- प्रतीक्षे! गृहं गत्वा (3) .......... गृहकार्यं क्रियते।
प्रतीक्षा- समीक्षे! सायंकाले किं त्वं पाठं पठसि?
समीक्षा- आम् प्रतीक्षे! सायंकाले मया पाठः पठ्यते।

| **मञ्जूषा** |
|---|
| मया, आगच्छामि, आगम्यते। |

**उत्तरम् :**
(1) आगम्यते, (2) आगच्छामि, (3) मया।

**अथवा**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत (केवलं त्रयाणाम्)-**

1. अहं श्लोक पठामि।
2. अहं पत्रं लिखामि।
3. एवमेव अहं करोमि।
4. वयं पुस्तकं पठामः।
5. ताः ग्रामे भ्रमन्ति।

**उत्तरम् :**
1. मया श्लोकः पठ्यते।
2. मया पत्रं लिख्यते।
3. एवमेव मया क्रियते।
4. अस्माभिः पुस्तकं पठ्यते।
5. ताभिः ग्रामे भ्रम्यन्ते।

**9. कालबोधकशब्दैः अधोलिखित- दिनचर्यां वा पूरयत- (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. रमा (5:00) .......... वादने उत्तिष्ठति।
2. सा (5:30) ......... वादने भ्रमणाय गच्छति।
3. सा (6:00) .......... वादने स्नानं करोति।
4. सा (6:30) ......... वादने विद्यालयं गच्छति।
5. सा (12:30) .......... वादने गृहं आगच्छति।

**उत्तरम् :**
1. पञ्च
2. सार्द्धपञ्च
3. षड्
4. सार्द्धषड्
5. सार्धद्वादश

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत- (केवलं प्रश्नषटकम्)** $1/2 \times 6 = 3$

1. .......... व्याघ्रः दृष्टिपथे समायाति।
2. ......... निद्रा न युज्यते।
3. अस्य याञ्चा .......... मा अस्तु।
4. .......... रात्रिः संजाता, गृहात् बहिः मा गच्छ।
5. भारति! तव अयं कोशः कः ......... अपूर्वः विद्यते।

6. ......... सोमवासरः आसीत्।
7. दग्धाः अश्वाः ......... अधावन्।
8. आकाशे मेघाः .......... गर्जन्ति।

| मञ्जूषा |
|---|
| सम्प्रति, इदानीम्, सहसा, अपि, वृथा, इतस्ततः, उच्चैः, ह्यः। |

**उत्तरम् :**

1. सहसा
2. सम्प्रति
3. वृथा
4 इदानीम्
5. अपि
6. ह्यः
7. इतस्ततः
8. उच्चैः

**11. अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. लतां राष्ट्रगीत गायति। (लता/लतायै/लतासु)
2. अग्निः तीव्राः भवति/(तीव्रः/तीव्रा/तीव्रम्)
3. अहं पत्रं लिखावः। (युवाम्/सः/आवाम्)
4. सः पत्रवाहकः अस्मि। (अस्ति/असि/आस्ताम्)

**उत्तरम् :**

1. लता।
2. तीव्रः।
3. आवाम्।
4. अस्ति।

## खण्डः – घ 30 अंकाः

## पठित–अवबोधनम्

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **5**

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशंकया तमन्वधावत् अगृह्णाच्च,परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत ''चौरोऽयं चौरोऽयम्'' इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्। तत्क्षणमेव रक्षापुरूषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) कीदृशी दैवगतिः?
   (ii) कः एव उच्चैः क्रोशितुमारभत?
   (iii) ग्रामवासिनः कम् चौरं मत्वाऽभर्त्सयन्?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) चौरः उच्चैः क्रोशितुं किम् आरभत?
   (ii) रक्षापुरूषः अतिथिं किम् प्रख्याप्य कारागृहे प्राक्षिपत्?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'रक्षापुरुषः' इति पदस्य किं क्रियापदं गद्यांशे प्रयुक्तम्?
   (क) प्राक्षिपत्
   (ख) आसीत्
   (ग) प्रविष्टः
   (ii) 'दैवगतिः' इति पदस्य किं विशेषण पदं गद्यांशे प्रयुक्तम्?
   (क) प्रविष्टः
   (ख) वराकः
   (ग) विचित्रा
   (iii) 'राजपुरूषः' इति पदस्य गद्यांशात् पर्यायवाचिशब्दं लिखत।
   (क) अतिथिः
   (ख) आरक्षी
   (ग) चौरः
   (iv) 'आगच्छन्' इति पदस्य कर्तृपदं किम्?
   (क) ग्रामवासिनः
   (ख) रक्षापुरुषः
   (ग) अतिथिः

**उत्तरम् :**

1. (i) विचित्रा।
   (ii) चौरः।
   (iii) अतिथिम्।
2. (i) चौरः उच्चैः क्रोशितुम् आरभत– ''चौरोऽयम् चौरोऽयम्'' इति।
   (ii) रक्षापुरूषः अतिथिं 'चौरोऽयम्' इति प्रख्याप्य कारागृहे प्राक्षिपत्।
3. (i) (क) प्राक्षिपत्।
   (ii) (ग) विचित्रा।
   (iii) (ख) आरक्षी।
   (iv) (क) ग्रामवासिनः।

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **5**

उदीरितोऽर्थः पशुनापि गृह्यते,
हयाश्च नागाश्च वहन्ति बोधिताः।
अनुक्तमप्यूहति पण्डितोजनः
पारेङ्गितज्ञनफला हि बुद्धयः।।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) कः उदीरितः अर्थः गृह्यते?

(ii) अनुक्तम् अपिं कः ऊहति?

(iii) नागाः कदा भारं वहन्ति?

2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$

(i) बोधिता के भारं वहन्ति?

(ii) बुद्धयः कीदृशः?

3. निर्देशानुसारम् उत्तरत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$

(i) श्लोके 'वहन्ति' क्रियापदस्य कर्तृपदं किम्?

(क) हयाः नागाः च

(ख) बोधिता

(ग) पशु

(ii) 'अश्वाः' इति पदस्य पर्याय पदं श्लोके किं प्रयुक्तम्?

(क) नागाः

(ख) हयाः

(ग) पण्डिता

(iii) 'मूर्खः' पदस्य कृते विलोमपदं श्लोके किम्?

(क) पण्डितः

(ख) जनः

(ग) हयाः

(iv) 'हयाश्च', नागाश्च ... इत्यस्मिन् पदे क्रियापदं किम्?

(क) वहन्ति

(ख) बोधिता

(ग) गृह्यते

**उत्तरम् :**

1. (i) पशु।
   (ii) पण्डितः।
   (iii) बोधिताः।
2. (i) बोधिताः हयाश्च नागाश्च भारं वहन्ति।
   (ii) पारेङ्गितज्ञानफला हि बुद्धयः।
3. (i) (क) हयाः नागाः च।
   (ii) (ख) हयाः।
   (iii) (क) पण्डितः।
   (iv) (क) वहन्ति।

**14. अधोलिखितं नाटयांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** **5**

चन्दनदासः– आर्य! किं मे भयं दर्शयसि? सन्तमपि गेहे अमात्यराक्षस्य गृहजनं न समर्पयामि, किं पुनरसन्तम्?

चाणक्यः– चन्दनदास! एष एव ते निश्चयः?

चन्दनदासः– बाढम्, एष एव मे निश्चयः।

चाणक्यः– (स्वगतम्) साधु! चन्दनदास साधु।

सुलभेष्वर्थलाभेषु, परसंवेदने जने।
क इदं दुष्करं कुर्यादिदानीं शिविना विना।।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$

(i) चन्दनदासः कस्य गृहजनं न समर्पयति?

(ii) अस्मिन् नाट्यांशे चन्दनदासस्य तुलना केन सह कृता?

(iii) चाणक्यः स्वमनसि कस्य प्रशंसां करोति?

2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$

(i) 'किं मे भयं दर्शयसि' इति कः कं प्रति कथयति?

(ii) कीदृशं कर्म चन्दनदासः करोति?

3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$

(i) नाटयांशे 'समर्पयामि' इति क्रियायाः कर्तृपदं किम्?

(क) त्वम् (चाणक्यः)

(ख) अहम् (चन्दनदासः)

(ग) साधु

(ii) 'सन्तमपि गेहे' इत्यत्र विशेष्यपदं किम्?

(क) गेहे

(ख) असन्तम्

(ग) साधु

(iii) 'सन्तम्' इति पदस्य नाट्यांशे किं विलोमपदं प्रयुक्तम्?

(क) निश्चयः

(ख) असन्तम्

(ग) बाढम्

(iv) 'कः' इति कर्तृपदस्य किं क्रियापदं नाट्यांशे प्रयुक्तम्?

(क) कुर्यात्

(ख) दर्शयसि

(ग) समर्पयामि

**उत्तरम् :**

1. (i) अमात्यराक्षस्य।
   (ii) शिविना सह।
   (iii) चन्दनदासस्य।
2. (i) इति चन्दनदासः चाणक्यं प्रति कथयति।
   (ii) न्यासरक्षणरूपं दुष्करं कर्म चन्दनदासः करोति।
3. (i) (ख) अहम् (चन्दनदासः)
   (ii) (क) गेहे
   (iii) (ख) असन्तम्
   (iv) (क) कुर्यात्

**15. रेखांकित–पदानि आधृत्य प्रश्ननिर्माणं कुरुत– (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. वानरः आगत्य <u>तस्य</u> पुच्छं धुनोति।
2. <u>वानरः</u> कूर्दित्वा वृक्षमारूढः।
3. वानराः वारं वारं <u>सिंहं</u> तुदन्ति।
4. पक्षिणः हर्षमिश्रितं <u>कलरवं</u> कुर्वन्ति।
5. त्वं <u>वनराजः</u> भवितुं सर्वथाऽयोग्यः।

**उत्तरम् :**

1. वानरः आगत्य कस्य पुच्छं धुनोति?
2. कः कूर्दित्वा वृक्षमारूढः?

3. वानराः वारं वारं कम् तुदन्ति?
4. पक्षिणः हर्षमिश्रितं किम् कुर्वन्ति?
5. त्वं कः भवितुं सर्वथाऽयोग्यः?

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकयोः अन्वयं पूरयत-** $1/2 \times 4 = 2$

I. उदीरितोऽर्थः पशुनापिगृह्यते, हयाश्च नागाश्च वहन्ति बोधिताः।
अनुक्तमप्यूहति पण्डितोजनः, पारेङ्गितज्ञानफला हि बुद्धयः।।

**अन्वयः-** पशुना अपि (1) .......... अर्थः गृह्यते, हयाः (2) .......... च बोधिताः (भारं) वहन्ति, पण्डितः जनः (3) .......... अपि ऊहति। बुद्धयः (4) .......... (भवन्ति)।

2. यदि न स्यान्नरपतिः सम्यङ् नेता ततः प्रजा।
अकर्णधारा जलधौ विप्लवेतेह नौरिव।। $\frac{1}{2} \times 4 = 2$

**अन्वयः-** यदि (1) .......... सम्यक् (2) .......... न स्यात्, ततः इह प्रजा (3) ......... नौः इव (4) ......... विप्लवेत्।

| मञ्जूषा |
|---|
| अनुक्तम्, पारेङ्गितज्ञानफलाः, नागाः, उदीरितः, अकर्णधारा, नरपतिः, जलधौ, नेता |

**उत्तरम् :**

I **अन्वयः** (1) उदीरितः, (2) नागाः, (3) अनुक्तम्, (4) पारेङ्गितज्ञानफलाः।

II **अन्वयः** (1) नरपतिः, (2) नेता, (3) अकर्णधारा, (4) जलधौ।

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत-** $1 \times 4 = 4$

अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम्।
अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः।। $1 \times 4 = 4$

**भावार्थः-** यथा मन्त्रहीनं विवेकहीनं वा ......... न भवति, तथा च औषधीय .......... आधारं (मूलम्) न भवति, तथैव संसारे कोऽपि जनः ......... न भवति, सर्वेषु जनेषु काऽपि विशेषता अवश्यमेव भवति, किन्तु तस्य योग्यतायाः .......... ज्ञाता च दुर्लभं भवति।

| **मञ्जूषा-** गुणविहीनम्, संयोजकः, अयोग्यः, अक्षरं |
|---|

**उत्तरम् :**

**भावार्थः-** यथा मन्त्रहीनं विवेकहीनं वा **अक्षरं** न भवति, तथा च औषधीय **गुणविहीनम्** आधारं (मूलम्) न भवति, तथैव संसारे कोऽपि जनः **अयोग्यः** न भवति, सर्वेषु जनेषु काऽपि विशेषता अवश्यमेव भवति, किन्तु तस्य योग्यतायाः **संयोजकः** ज्ञाता च दुर्लभं भवति।

**17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत-** $1/2 \times 8 = 4$

1. छात्रावासे निवसन् सः अध्ययने संलग्नः समभूत्।
2. धनस्य अभाव कारणात् सः बसयानं विहाय पदातिरेव प्राचलत्।
3. पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्।
4. तेन स्वपुत्रं महाविद्यालये प्रवेशं दापयितुं सफलो जातः।
5. करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।
6. एकदा पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः।
7. कश्चन निर्धनः जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्।
8. सः पुत्रं द्रष्टुं प्रस्थितः।

**उत्तरम् :**

1. कश्चन निर्धनः जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्।
2. तेन स्वपुत्रं महाविद्यालये प्रवेशं दापयितुं सफलो जातः।
3. छात्रावासे निवसन् सः अध्ययने संलग्नः समभूत्।
4. एकदा पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः।
5. सः पुत्रं द्रष्टुं प्रस्थितः।
6. धनस्य अभाव कारणात् सः बसयानं विहाय पदातिरेव प्राचलत्।
7. पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्।
8. करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

**18. 'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति। तानि यथासमक्षं लिखत-** $1 \times 3 = 3$

(केवलं प्रश्नत्रयम्)

| क | ख |
|---|---|
| वयस्य | जननी |
| भणति | कथयति |
| अम्बा | मित्रम् |
| उत | अथवा |

**उत्तरम् :**

| | | |
|---|---|---|
| वयस्य | = | मित्रम् |
| भणति | = | कथयति |
| अम्बा | = | जननी |
| उत | = | अथवा |

**अथवा**

**अधोलिखितवाक्येषु रेखांकितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. तस्य समुदाचारः शोभनीयः वर्तते।
(क) समाचारः
(ख) कदाचारः
(ग) शिष्टाचारः

**उत्तरम् :** (ग) शिष्टाचारः

2. जगति सर्वत्र प्रदूषणं जातम्।
(क) संसारे

(ख) नगरे

(ग) ग्रामे

**उत्तरम् :** (क) संसारे

3. सः बालकः जागृतः।

(क) चञ्चलः

(ख) सुन्दरः

(ग) प्रबुद्धः

**उत्तरम् :** (ग) प्रबुद्धः

4. सा किमपि न भणति।

(क) कथयति

(ख) गच्छति

(ग) पलायति

**उत्तरम् :** (क) कथयति

WWW.CBSE.ONLINE

Download unsolved version of this paper from www.cbse.online

This sample paper has been released by website www.cbse.online for the benefits of the students. This paper has been prepared by subject expert with the consultation of many other expert and paper is fully based on the exam pattern for 2019-2020. Please note that website www.cbse.online is not affiliated to Central board of Secondary Education, Delhi in any manner. The aim of website is to provide free study material to the students.